**अधिवस्त्र** त्रि॰ अध्याहृतं वस्त्रं येन प्रा॰ब॰। उपरिनिहित वस्त्रे। "यज्ञेभिराहृतोऽधिवस्त्रा बधूरिवेति" ऋ॰ ८,२६,१३, अधिवस्त्रा उपरिनिहितवस्त्रेति भा॰।

**अधिवाक** पु॰ अधि–वच–घञ्। पक्षपातेन वचने। "तस्मिन्वनेषु हितेष्वधिवाकाय हूर्न्ति" इति ऋ॰८,१५,५, "अधिवाकाय पक्षपातवचनायेति" भा॰।

**अधिवास** पु॰ अधि+वस निवासे–घञ्। निवासे "श्रीः कैटभारिहृदयैककृताधिवासेति" देवीमा॰। अधि+वास सुरभीकरणे भावे घञ्। सौरभे "ककुद्मिकन्यावक्त्रान्तर्वासलब्धाधिवासयेति" माघः "अधिवासस्पृहयेव मारुत" इति रघुः। अधिवासयति देवता अनेन अधि+वस–णिच् करणे घञ्। यज्ञारम्भपूर्व्वदिवसे देवतास्थापनादिकर्म्मणि। "अधिवासः परेऽहनीति" स्मृतिः "मध्यरात्रेऽधिवासयेदिति" स्मृत्युक्तेस्तस्य पूर्व्वेद्युर्मध्यरात्रे कर्त्तव्यता। "आत्ययिकेषु कार्य्येषु सद्यएवाधिवासये"दित्युक्ते र्यागदिनेऽपि क्वचित् कर्त्तव्यता। गन्धमाल्याद्यैः संस्कारे च।

**अधिवासन** न॰ अधिवासयति स्थापयति देवता अनेन अधि+वस–णिच् ल्युट्। यागपूर्बदिने देवताद्यावाहनपूर्बकपूजनादिकर्म्मभेदे। अधिवास्यते सुरभीक्रियते अधि+वास सुरभीकरणे भावे ल्युट्। गन्धमाल्यादिभिः सुरभीकरणरूपसंस्कारभेदे तद्द्रव्याणि च "मही गन्धः शिला धान्यं दूर्वा पुष्पं फलं दधि। घृतं स्वस्तिकसिन्दूरं शङ्खकज्जलरोचनाः। सिद्धार्थं काञ्चनं रौप्यं ताम्रचामरदर्पणम्। दीपः प्रशस्तिपात्रञ्च विज्ञेयमधिवासने" इति स्मृत्युक्तानि वेद्यानि। "सायं षष्ठ्यान्तु कर्त्तव्यं पार्वत्या अधिवासनमिति" पुरा॰।

**अधिवासित** त्रि॰ अधि+वास–सुरभीकरणे कर्म्मणि क्त। सुरभीकृते गन्धमाल्यादिभिः कृतसंस्कारे। अधि+वास–निवासे णिच् कर्म्मणि क्त। कृताधिवासने देवादौ।

**अधिवाहन** न॰ अधि+वह–णिच्–ल्युट्। उपरि प्रापणे वाहने, च। विभ॰अव्ययी॰। वाहनं यानमधिकृत्येत्यर्थे अव्य॰।

**अधिविकर्त्तन** न॰ अधि+वि+कृत–छेदने ल्युट्। अत्यन्तच्छेदने "आशासनं विशासनमथो अधिविकर्त्तनमिति" ऋ॰ १०,८५,३५।

**अधिविद्य** अव्य॰ विद्यायां विभक्त्य॰ अव्ययी॰। विद्यामधिकृत्येत्यर्थे। "अधिविद्यं प्रकाशते इति" वाक्यपदीयम्।

**अधिविन्ना** स्त्री अधि+विद–लाभे कर्म्मणि क्त। कृताधिवेदनायां यस्या उपरि विवाहान्तरं कृतं तस्यां स्त्रियाम् "अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहादिति" मनुः। अधिविन्नस्त्रियै देयमाधिवेदिनकं सममिति" याज्ञ॰।

**अधिवेत्तृ** पु॰ अधि+विद–लाभे कर्तरि तृच्। विवाहोत्तरं विवाहान्तरकर्त्तरि।

**अधिवेद** अव्य॰ वेदे–विभक्त्य॰अव्ययी॰। वेदमधिकृत्येत्यर्थे। अधि+विद–भावे घञ्। विवाहोत्तरं विवाहान्तरकरणे पु॰

**अधिवेदन** न॰ अधि+विद–लाभे भावे ल्युट्। विवाहोपरिविवाहान्तरकरणे। तत्र नियुक्तादि ठक्। आधिवेदनिकम् अधिवेदनविषयनियुक्ते तत्रलब्धे च धनादौ त्रि॰। "अधिविन्नस्त्रियै देयमाधिवेदनिकं सममिति" याज्ञ॰। "आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्त्तितमिति" स्मृतिः। अधिवेदनकालनिमित्ते तु मत्कृतबहुविवाहवादे विस्तरत उक्ते तत एवावसेये।

**अधिवेदनीय** स्त्री अधि+विद–लाभे कर्म्मणि–अनीयर्। यद्विवाहोपरि विवाहान्तरकरणयोग्यं तादृश्यां स्त्रियाम्। कर्मणि यत्। अधिवेद्याप्यत्र स्त्री। "बन्ध्याष्टमेऽधिवेद्याब्दे" इति मनुः। [ल्युट्। पाचने।

**अधिश्रपण** न॰ अधि+श्रा–पाके णिच्–पुक् ह्रस्वश्च भावे

**अधिश्रय** पु॰अधि+श्री–पाके भावे अच्। चूल्ल्यामुपरिस्थापनरूपे विक्लित्तिहेतुभूते व्यापारे, पाके।

**अधिश्रयण** न॰ अधि उपरि श्रयणं पाकार्थं स्थापनं श्रीञ्–भावे ल्युट्। चूल्ल्या उपरि स्थापने, तत्पूर्व्वकपाके च। अधिश्रीयते पच्यतेऽत्र, आधारे ल्युट् ङीप्। चूल्ल्याम् (आका) इति, (चूला), इति च ख्यातायाम् स्त्री।

**अधिश्रयणीय** त्रि॰अधिश्रयणाय पाकाय हितम् छ। पाकसाधनपात्रे। अधिश्रयितुमर्हति अधि+श्री–पाके अर्हार्थे कर्म्मणि अनीयर्। पाकार्हे वस्तुनि त्रि॰।

**अधिश्रयितवै** अव्य॰ अधि+श्री–पाके वेदे कृत्यार्थे तवै। पचनीये "गौरेव दुग्धमधिश्रयितवै ब्रूयादिति" वेदः।

**अधिश्री** त्रि॰ अधिका श्रीर्यस्य। अधिकशोभान्विते अधिकसम्पत्तिमति च "इयं महेन्द्रप्रभृतीनधिश्रिय" इति कुमा॰ "समादिदेशाधिकृतानधिश्रीरिति" रघुः।

**अधिषवण** न॰ अधिषूयते सोमः यत्र अधि+षू अभिषवे आधारे ल्युट्। सोमाभिषवसाधनचर्म्मादिपात्रे। "अंशून् इव ग्रावाभिषवणे" इति वेदः। भावे ल्युट्। अभिषवे।

**अधिषवण्य** त्रि॰अधिषवणाय हितम् यत्। अभिषवसाधने फलके। "यत्र द्वाविव जघनाधिषवण्या कृता" इति ऋ॰ १,२८,२ अधिषवण्या उभे अधिषवणफलके इति भा॰।